अभावः। तत्पर्य्यायः। अ २ नो ३ न ४। इत्यमरः॥ अन ५ अना ६ ना ७। इति भरतः॥ (यथा, महाभारते। ४। २४। १३।
"नहि विद्मो गतिं तेषां वासं हि नरसत्तम!॥")

नहुषः, पुं, (नह्यते इति। नह+"पृनहिकलिभ्य उषच्।" उणां। ४। ७५। इति कर्म्मणि कर्त्तरि वा उषच्।) नागभेदः। (यथा, महाभारते। १। ३५। ६।
"आप्तः करोटकश्चैव शङ्खो वालिशिखस्तथा।
निष्टानको हेमगुहो नहुषः पिङ्गलस्तथा॥")
चन्द्रवंशीयराजभेदः। इति मेदिनी। षे, १८॥ स च पुरूरवसो ज्येष्ठपुत्त्रस्यायुषः सुतः। इति पुराणम्॥ (अयं हि अगस्त्यशापात् अजागरत्वमाप्तो वनमध्ये बहुकालं स्थितवान् ततः कदाचित् भीमं ग्रसन् युधिष्ठिरात् मुक्तिमाप। एतद्विवरणं यथा, महाभारते। ३। १८१। ३३-४५।
"अहं हि दिवि दिव्येन विमानेन चरन् पुरा।
अभिमानेन मत्तः सन् कञ्चिन्नान्यमचिन्तयम्॥
ब्रह्मर्षिदेवगन्धर्व्वयक्षराक्षसपन्नगाः।
करान्मम प्रयच्छन्ति सर्व्वे त्रैलोक्यवासिनः॥
चक्षुषा यं प्रपश्यामि प्राणिनं पृथिवीश्वर!।
तस्य तेजो हराम्याशु तद्धि दृष्टेर्बलं मम॥
ब्रह्मर्षीणां सहस्रं हि उवाह शिविकां मम।
स मामपनयो राजन्! भ्रंशयामास वै श्रियः॥
तत्र ह्यगस्त्यः पादेन वहन् स्पृष्टो मया मुनिः।
अगस्त्येन ततोऽस्म्युक्तो ध्वंस सर्पेति वै रुषा॥
ततस्तस्माद्विमानाग्र्यात् प्रच्युतश्च्युतभूषणः।
प्रपतन् बुबुधेऽऽत्मानं व्यालीभूतमधोमुखम्॥
अयाचं तमहं विप्रं शापस्यान्तो भवेदिति।
प्रमादात् संप्रमूढस्य भगवन्! क्षन्तुमर्हसि॥
ततः स मामुवाचेदं प्रपतन्तं कृपान्वितः।
युधिष्ठिरो धर्म्मराजः शापात्त्वां मोक्षयिष्यति॥
अभिमानस्य घोरस्य पापस्य च नराधिप!।
फले क्षीणे महाराज! फलं पुण्यमवाप्स्यसि॥
ततो मे विस्मयो जातस्तद्दृष्ट्वा तपसो बलम्।
ब्रह्म च ब्राह्मणत्वञ्च येन त्वाहमचूचुदम्॥
सत्यं दमस्तपो दानमहिंसा धर्म्मनित्यता।
साधकानि सदा पुंसां न जातिर्न कुलं नृप!॥
अरिष्ट एष ते भ्राता भीमसेनो महाबलः।
स्वस्ति तेऽस्तु महाराज! गमिष्यामि दिवं पुनः॥
वैशम्पायन उवाच।
इत्युक्त्वाजगरं देहं त्यक्त्वा स नहुषो नृपः।
दिव्यं वपुः समास्थाय गतस्त्रिदिवमेव हि॥"*॥
(नह्यति सर्व्वाणि भूतानि मायथेति। विष्णुः। यथा, महाभारते। १३। १४९। ४७।
"इष्टो विशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः॥")

नहुषाख्यं, क्ली, (नहुष आख्या यस्य।) तगरपुष्पम्। इति राजनिर्घण्टः॥

नहुषात्मजः, पुं, (नहुषस्य आत्मजः।) ययातिराजा। इति पुराणम्॥ (वाच्यलिङ्गेऽपि दृश्यते। तथाहि महाभारते। १। ७८। १४।
"अथ तं देशमभ्यागाद्ययातिर्नहुषात्मजः॥")

ना, व्य, (नह बन्धे+बाहुलकात् डा।) नहि। अभावः। इत्यमरटीकायां भरतः॥

ना, [ऋ] पुं, (नयति नीयते वा। नी प्रापणे+"नयतेर्डिच्च।" उणां २। १०१। इति ऋ प्रत्ययः। स च डित्।) पुरुषः। इत्यमरः। २। ६। १॥ (यथा, माघः। २। ४२।
"विधाय वैरं सामर्षे नरोऽरौ य उदासते।
प्रक्षिप्योदर्च्चिषं कक्षे शेरते तेऽभिमारुतम्॥")

नाकः, पुं, (न कं सुखमिति अकं दुःखम्। तन्नास्त्यत्रेति।) स्वर्गः। इत्यमरः। १। १। ६॥ (यथा, भट्टिः। १। ४।
"सन्तर्पणो नाकसदां वरेण्यः॥"
नभः। इति निघण्टुः। १। ४॥ यथा, महाभारते। १। १७२। ६।
"य एष दिवि धिष्ण्येन नाकं व्याप्नोति तेजसा॥"
क्ली, अस्त्रजातिविशेषः। यथा, महाभारते। ५। ९६। ४०।
"काकुदीकं शुकं नाकमक्षिसन्तर्जनं तथा।
सन्तानं नर्त्तनं घोरमास्यमोदकमष्टमम्॥
एतैर्विद्धाः सर्व्व एव मरणं यान्ति मानवाः॥"
क्षत्त्रियजातिविशेषः। यथा, वायुपुराणे।
"नव नाकास्तु भोक्ष्यन्ति पुरीं चम्पावतीं नृपाः॥")

नाकनाथः, पुं, (नाकस्य स्वर्गस्य नाथः।) इन्द्रः। इति त्रिकाण्डशेषः॥

नाकनायकः, पुं, (नाकस्य नायकः।) इन्द्रः। यथा, नैषधे ५ सर्गे।
"स व्यतीत्य वियदन्तरगाधं
नाकनायकनिकेतनमाप॥"

नाकनायकपुरोहितः, पुं, (नाकनायकस्य इन्द्रस्य पुरोहितः।) बृहस्पतिः। यथा,—
"धीधर्म्मतनयद्युनस्थितो
नाकनायकपुरोहितः शुभः॥"
इति ज्योतिषतत्त्वम्॥

नाकी, [न्] पुं, (नाकः स्वर्गो वासस्थानत्वेनास्त्यस्येति। नाक+इनिः।) देवता। इति हेमचन्द्रः॥ (यथा, राजेन्द्रकर्णपूरे। ९।
"देवाकर्णय नाकिनां पुरि शुभां लोके पुरे
भोगिनाम्॥")

नाकुः, पुं, (नम्यतेऽनेनेति। नम+"फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च।" उणां १। १९। इति उः धातोर्नाकिः। इकार उच्चारणार्थः।) वल्मीकः। इत्यमरः। २। १। १४॥ मुनिविशेषः। पर्व्वतः। इति मेदिनी के, २७॥

नाकुलः, पुं, (नकुलस्य गोत्रापत्यम्। नकुल+"ऋष्यन्धकवृष्णिकुरुभ्यश्च।" ४। १। ११४। इत्यण्।) नकुलपुत्त्रः। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते। ६। ४७। ५१।
"शवराः कुन्तलाश्चैव वसुधाश्च सह नाकुलैः।
नकुलः सहदेवश्च वामं पार्श्वं समाश्रिताः॥"
तन्त्रविशेषे, क्ली। यथा, कूर्म्मपुराणे।
"एवं सम्बोधितो रुद्रो माधवेन मुरारिणा।
चकार मोहशास्त्राणि केशवोऽपि शिवेरितः॥
कापालं नाकुलं वामं भैरवं पूर्व्वपश्चिमम्।
पञ्चरात्रं पाशुपतं तथान्यानि सहस्रशः॥"
नकुलस्येदम्। तस्येदमित्यण्।) नकुलसम्बन्धिनि, त्रि॥ (न आकुलः इति विग्रहे। अनाकुलश्च॥)

नाकुली, स्त्री, (नकुलेन दृष्टा पीता वा। नकुल+अण्+ङीप्।) कुक्कुटीकन्दः। रास्ना। चविका। इति मेदिनी। ले, १०१॥ यवतिक्ता। श्वेतकण्टकारी। कन्दविशेषः। नाइ इति ख्याता॥ तत्पर्य्यायः। सर्पगन्धा २ सुगन्धा ३ रक्तपत्त्रिका ४ ईश्वरी ५ नागगन्धा ६ अहिभुक् ७ सरसा ८ सर्पादनी ९ व्यालगन्धा १०। अस्या गुणाः। तिक्तत्वम्। कटुत्वम्। उष्णत्वम्। त्रिदोषानेकविषनाशित्वञ्च। इति राजनिर्घण्टः॥

नाक्षत्रं, क्ली (नक्षत्रस्येदमिति। नक्षत्र+"तस्येदम्।" ४। ३। १२०। इति अण्।) नक्षत्रसम्बन्धि। (यथा, सूर्य्यसिद्धान्ते। १४। १५।
"भचक्रभ्रमणं नित्यं नाक्षत्रं दिनमुच्यते।
नक्षत्रनाम्ना मासास्तु ज्ञेयाः पर्व्वान्तयोगतः॥")
मासविशेषे, पुं। स च द्विविधः। सप्तविंशतिनक्षत्रात्मक एकः। यथा, विष्णुधर्म्मोत्तरे।
"नक्षत्रसत्राण्ययनानि चेन्दो-
र्मानेन कुर्य्याद्भगणात्मकेन।"
सप्तविंशतिनक्षत्रात्मकेन।
"सर्व्वर्क्षपरिवर्त्तैश्च नाक्षत्र इह चोच्यते।"
सप्तविंशतिनक्षत्रावच्छिन्नो नाक्षत्रः। अस्य प्रयोजनं नक्षत्रसत्रादौ। जन्मनक्षत्रे शनिभौमवारयोगे मनोदुःखदाने च। यथा, दीपिकायाम्।
"जन्मनर्क्षे यदि स्यातां वारौ भौमशनैश्चरौ।
स मासः कलुषो नाम मनोदुःखप्रदायकः॥"
द्वितीयः षष्टिदण्डात्मकनक्षत्रभोगकालरूपदिनत्रिंशदात्मकः। यथा, सूर्य्यसिद्धान्ते। १। १२।
"नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रचक्षते।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा॥"
द्वितीयस्य प्रयोजनं आयुर्गणनायाम्। यथा,
"आयुर्दाये स्मृतं प्राज्ञैर्नाक्षत्रं षष्टिनाडिकम्॥"
इति मलमासतत्त्वम्॥

नाक्षत्रिकः, पुं, (नक्षत्रादागतः। नक्षत्र+ठञ्।) नाक्षत्रमासः। यथा, शब्दरत्नावल्याम्।
"नक्षत्रगणनेनैष नाक्षत्रिक उदाहृतः॥"

नाक्षत्रिकी, स्त्री, (नाक्षत्रिक+ङीप्।) नक्षत्रदशा। यथा। "कलौ नाक्षत्रिकी दशा।" इति ज्योतिषम्। अस्या विवरणं दशाशब्दे द्रष्टव्यम्॥ नक्षत्रसम्बन्धिनि, त्रि॥

नागं, क्ली, (नगे पर्व्वते भवम्। नग+अण्।) रङ्गम्। सीसकम्। (अस्य पर्य्यायो यथा,—
"नागं महाबलं चीनं पिष्टं योगेष्टसीसकम्॥"
इति वैद्यकरत्नमालायाम्॥)
करणविशेषः। इति मेदिनी। गे, ९॥ नागकरणजातफलम्। तथा,—